# yatirAja saptatiH

# યતિરાજ સપ્તતિઃ

## Document Information

Text title : yatirAjasaptatiH

File name : yatirAjasaptatiH.itx

Category : major_works, vedAnta-deshika, vedanta

Location : doc_z_misc_major_works

Author : vedAntadeshika

Source : Stotras of Vedanta Desika

Latest update : October 2, 2017, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 17, 2024

*sanskritdocuments.org*

# યતિરાજ સપ્તતિઃ

શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્ય વર્યોમે સન્નિધત્તાં સદા હૃદિ ॥

કમપ્યાદ્યં ગુરું વન્દે કમલાગૃહમેધિનમ્ ।
પ્રવક્તા છન્દસાં વક્તા પઞ્ચરાત્રસ્ય યઃ સ્વયમ્ ॥ ૧॥

સહધર્મચરીં શૌરેઃ સંમન્ત્રિતજગદ્ધિતામ્ ।
અનુગ્રહમયીં વન્દે નિત્યમજ્ઞાતનિગ્રહામ્ ॥ ૨॥

વન્દે વૈકુણ્ઠસેનાન્યં દેવં સૂત્રવતીસખમ્ ।
યદ્વેત્રશિખરસ્પન્દે વિશ્વમેતદ્ વ્યવસ્થિતમ્ ॥ ૩॥

યસ્ય સારસ્વતસ્રોતો વકુલામોદવાસિતમ્ । var સારસ્વતં સ્રોતો
શ્રુતીનાં વિશ્રમાયાલં શઠારિં તમુપાસ્મહે ॥ ૪॥

નાથેન મુનિના તેન ભવેયં નાથવાહનમ્ । var મુનિનાથેન
યસ્ય નૈગમિકં તત્ત્વં હસ્તામલકતાં ગતમ્ ॥ ૫॥

નમસ્યામ્યરવિન્દાક્ષં નાથભાવે વ્યવસ્થિતમ્ ।
શુધ્દસત્વમયં શૌરેરવતારમિવાપરમ્ ॥ ૬॥

અનુજ્ઝિતક્ષમાયોગમપુણ્યજનબાધકમ્ ।
અસ્પૃષ્ટમદિરાગં તં રામં તુર્યમુપાસ્મહે ॥ ૭॥ var અસ્પૃષ્ટમદિરા ગન્ધં

વિગાહે યામુનં તીર્થં સાધુ વૃન્દાવને સ્થિતમ્ ।
નિરસ્તજિહ્મગસ્પર્શે યત્ર કૃષ્ણઃ કૃતાદરઃ ॥ ૮॥

દયા નિઘ્નં યતીન્દ્રસ્ય દેશિકં પૂર્ણમાશ્રયે।
યેન વિશ્વસૃજો વિષ્ણોરપૂર્યત મનોરથઃ ॥ ૯॥

પ્રણામં લક્ષ્મણમુનિઃ પ્રતિગૃહ્ણાતુ મામકમ્ ।
પ્રસાધયતિ યત્સૂક્તિઃ સ્વાધીન પતિકાં શ્રુતિમ્ ॥ ૧૦॥

ઉપવીતિનમૂર્ધ્વપુણ્ડ્રવન્તં
ત્રિજગત્પુણ્યફલં ત્રિદણ્ડહસ્તમ્ ।
શરણાગતસાર્થવાહમીડે
શિખયા શેખરિણં પતિં યતીનામ્ ॥ ૧૧॥

પ્રથયન્ વિમતેષુ તીક્ષ્ણભાવં
પ્રભુરસ્મત્પરિરક્ષણે યતીન્દ્રઃ ।
અપૃથક્પ્રતિપન્ન યન્મયત્વૈઃ
વવૃધે પઞ્ચભિરાયુધૈર્મુરારેઃ ॥ ૧૨॥

શમિતોદયશઙ્કરાદિગર્વઃ
સ્વબલાદુધ્દૃતયાદવપ્રકાશઃ ।
અવરોપિતવાન્ શ્રુતેરપાર્થાન્
નનુ રામાવરજઃ સ એષ ભૂયઃ ॥ ૧૩॥ var એવ

અબહુશ્રુતસંભવં શ્રુતીનાં
જરતીનામયથાયથ પ્રચારમ્ ।
વિનિવર્તયિતું યતીશ્વરોક્તિઃ
વિદધે તાઃ સ્થિરનીતિપઞ્જરસ્થાઃ ॥ ૧૪॥

અમુના તપનાતિશાયિ ભૂમ્ના
યતિરાજેન નિબધ્દનાયકશ્રીઃ ।
મહતી ગુરુપઙ્ક્તિહારયષ્ટિઃ
વિબુધાનાં હૃદયઙ્ગમા વિભાતિ ॥ ૧૫॥

અલૂનપક્ષસ્ય યતિ ક્ષમાભૃતો
વિભાતિ વંશે હરિતત્વમક્ષતમ્ ।
યદુદ્ભવાઃ શુધ્દસુવૃત્તશીતલાઃ
ભવન્તિ મુક્તાવલિભૂષણં ભુવઃ ॥ ૧૬॥

અનપાય વિષ્ણુપદસંશ્રયં ભજે
કલયા કયાઽપિ કલયાઽપ્યનુજ્ઝિતમ્ ।
અકલઙ્કયોગમજડાશયોદયં var અકલઙ્કયોગમજડાશયોદિતં
યતિરાજચન્દ્રમુપરાગ દૂરગમ્ ॥ ૧૭॥

અભિગમ્ય સમ્યગનઘાઃ સુમેધસો
યતિ ચક્રવર્તિપદપદ્મપત્તનમ્ ।

હરિભક્તદાસ્યરસિકાઃ પરસ્પરં
ક્રયૈક્રયાર્હદશયા સમિન્ધતે ॥ ૧૮॥

પરુષાતિવાદપરિવાદપૈશુન-
પ્રભૃતિ પ્રભૂતપતનીયપઙ્કિલા ।
સ્વદતે મમાધ્ય સુભગા સરસ્વતી
યતિરાજકીર્ત્તિકતકૈર્વિશોધિતા ॥ ૧૯॥

અનુકલ્પભૂતમુરભિત્પદં સતાં
અજહત્ત્રિવર્ગમપવર્ગવૈભવમ્ ।
ચલચિત્તવૃત્તિવિનિવર્ત્તનૌષધં
શરણં યતીન્દ્રચરણં વૃણીમહે ॥ ૨૦॥

શ્વસિતાવધૂતપરવાતિવૈભવાઃ
નિગમાન્તનીતિજલધેસ્તલસ્પૃશઃ ।
પ્રતિપાદયન્તિ ગતિમાપવર્ગિકીં
યતિસાર્વભૌમપદસાત્કૃતાશયાઃ ॥ ૨૧॥

મૂલે નિવિશ્ય મહતાં નિગમદ્રુમાણાં
મુષ્ણન્ પ્રતારકભયં ધૃતનૈકદણ્ડઃ ।
રઙ્ગેશ ભક્તજનમાનસરાજહંસો
રામાનુજઃ શરણમસ્તુ મુનિઃ સ્વયં નઃ ॥ ૨૨॥

સન્મન્ત્રવિત્ ક્ષિપતિ સંયમિનાં નરેન્દ્રઃ
સંસારજિહ્મગમુખૈઃ સમુપસ્થિતં નઃ ।
વિષ્વક્તતં વિષયલોભવિષં નિજાભિઃ
ગાઢાનુભાવગરુડધ્વજભાવનાભિઃ ॥ ૨૩॥

નાથઃ સ એષ યમિનાં નખરશ્મિજાલૈઃ
અન્ત નિલીનમપનીય તમો મદીયમ્ ।
વિજ્ઞાનચિત્રમનઘં લિખતીવ ચિત્તે
વ્યાખ્યાનકેલિરસિકેન કરામ્બુજેન ॥ ૨૪॥

ઉદ્ધૃતીમુપનિષત્સુ નિગૂઢમર્થં
ચિત્તે નિવેશયિતુમલ્પધિયાં સ્વયં નઃ ।
પશ્યેમ લખ઼્શ્મણ્ મુનેઃ પ્રતિપન્નહસ્તાં
ઉન્નિદ્રપદ્મસુભગામુપદેશમુદ્રામ્ ॥ ૨૫॥ var તત્ત્વ

આકર્ષણાનિ નિગમાન્તસરસ્વતીનાં
ઉચ્ચાટનાનિ બહિરન્તરુપપ્લવાનામ્ ।
પથ્યાનિ ઘોરભવસંજ્વરપીડિતાનાં
હૃધ્યાનિ ભાન્તિ યતિરાજમુનેર્વચાંસિ ॥ ૨૬॥

શીતસ્વભાવસુભગાનુભવઃ શિખાવાન્
દોષાવમર્દનિયતોન્નતિરોષધીશઃ ।
તાપાનુબન્ધશમનસ્તપનઃ પ્રજાનાં
રામાનુજો જયતિ સંવલિતત્રિધામા ॥ ૨૭॥

જયતિ સકલવિદ્યાવાહિની જન્મશૈલો
જનિપથપરિવૃત્તિશ્રાન્તવિશ્રાન્તિશાખી ।
નિખિલકુમતિ માયા શર્વરી બાલસૂર્યો
નિગમજલધિવેલા પૂર્ણચન્દ્રો યતીન્દ્રઃ ॥ ૨૮॥

મુનિબહુમતસારા મુક્તિનિશ્રેણિકેયં
સહૃદયહૃદયાનાં શાશ્વતી દિષ્ટસિધ્દિઃ ।
શમિતદુરિતગન્ધા સંયમીન્દ્રસ્ય સૂક્તિઃ  var શમિતવિમતખેદા
પરિચિતગહના નઃ પ્રસ્નુવીત પ્રસાદમ્ ॥ ૨૯॥

ભવમરુપરિખિન્નસ્ફીતપાનીયસિન્ધુઃ  var સિધ્દિઃ
દુરિતરહિતજિહ્વા દુગ્ધકુલ્યા સકુલ્યા ।
શ્રુતિનયનસનાભિઃ શોભતે લક્ષ્મણોક્તિઃ
નરકમથનસેવાસ્વાદનાડિંધમા નઃ ॥ ૩૦॥

હરિપદમકરન્દસ્યન્દિનઃ સંશ્રિતાનાં
અનુગતબહુશાખાસ્તાપમુન્મૂલયન્તિ ॥

શમિતદુરિતગન્ધાઃ સંયમીન્દ્રપ્રબન્ધાઃ
કથકજનમનીષા કલ્પના કલ્પવૃક્ષાઃ ॥ ૩૧॥

નાનાભૂતૈર્જગતિ સમયૈર્નર્મલીલાં વિધિત્સોઃ
અન્ત્યં વર્ણં પ્રથયતિ વિભોરાદિમવ્યૂહભેદે ।  var ભેદૈઃ
વિશ્વં ત્રાતું વિષયનિયતં વ્યઞ્જિતાનુગ્રહઃ સન્
વિષ્વક્સેનો યતિપતિરભૂદ્વેત્રસારસ્ત્રિદણ્ડઃ ॥ ૩૨॥

લક્ષ્યં બુધ્દે રસિકરસનાલાસ્યલીલાનિદાનં
શુધ્દાસ્વાદં કિમપિ જગતિ શ્રોત્રદિવ્યૌષધં નઃ ।
લક્ષ્યાલક્ષ્યૈઃ સિતજલધિવદ્ભાતિ તાત્પર્યરત્નૈઃ
લક્ષ્મીકાન્ત સ્ફટિકમુકુરો લક્ષ્મણાર્યોપદેશઃ ॥ ૩૩॥

સ્થિતિમવધીરયન્ત્યતિમનોરથસિધ્દિમતીં
યતિપતિસંપ્રદાયનિરપાયધનોપચિતાઃ ।
મધુકરમૌલિદઘ્નમદદન્તુરદન્તિઘટા-
કરટકટાહવાહિ ઘનશીકરશીભરિતામ્ ॥ ૩૪॥ var શીકરિતામ્

નિરુપધિ રઙ્ગવૃત્તિ રસિકાનભિતાણ્ડવયન્
નિગમવિમર્શકેલિરસિકૈર્નિભૃતૈર્વિધૃતઃ । var નિરતૈઃ
ગુણપરિણધ્દસૂક્તિ દૃઢકોણવિઘટ્ટનયા
રટતિ દિશા મુખેષુ યતિરાજયશઃ પટહઃ ॥ ૩૫॥

ઇદં પ્રથમસંભવત્કુમતિ જાલકૂલઙ્ગષાઃ
મૃષા મતવિષાનલજ્વલિતજીવજીવાતવઃ ।
ક્ષરન્ત્યમૃતમક્ષરં યતિ પુરન્દરસ્યોક્તયઃ
ચિરન્તનસરસ્વતિ ચિકુરબન્ધસૈરન્ધ્રિકાઃ ॥ ૩૬॥

સુધાશનસુદુર્ગ્રહ શ્રુતિસમષ્ટિમુષ્ટિન્ધ્યઃ
કથાહવમસૌ ગતાન્ કપટસૌગતાન્ ખણ્ડયન્ ।
મુનિર્મનસિ લક્ષ્મણો મુદમ્દઞ્ચયત્યઞ્જસા
મુકુન્દ ગુણમૌક્તિકપ્રકરશુક્તિભિઃ સૂક્તિભિઃ ॥ ૩૭॥

કપર્દિમતકર્દમં કપિલકલ્પનાવાગુરાં
દુરત્યયમતીત્ય તદ્દ્રુહિણતન્ત્રયન્ત્રોદરમ્ ।
કુદૃષ્ટિ કુહનામુખે નિપતતઃ પરબૃહ્મણઃ
કરગ્રહવિચક્ષણો જયતિ લક્ષ્મણોઽયં મુનિઃ ॥ ૩૮॥

કણાદપરિપાટિભિઃ કપિલકલ્પનાનાટકૈઃ
કુમારિલકુભાષિતૈર્ગુરુનિબન્ધનગ્રન્થિભિઃ ।
તથાગતકથાશતૈસ્તદનુસારિ જલ્પૈરપિ
પ્રતારિતમિદં જગત્ પ્રગુણિતં યતીન્દ્રોક્તિભિઃ ॥ ૩૯॥

કથાકલહકૌતુકગ્રહગ્રૃહીતકૌતસ્કુત-
પ્રથા જલધિ સંપ્લવગ્રસનકુમ્ભસમ્ભૂતયઃ ।

જયન્તિ સુધિયો યતિક્ષિતિભૃદન્તિકોપાસના- var યતિક્ષિતિભૃદન્તિકોપાસનપ્રભાવ
પ્રભાવપરિપક્ત્રિમ પ્રમિતિ ભારતી સંપદઃ ॥ ૪૦॥

યતીશ્વરસરસ્વતી સુરભિતાશયાનાં સતાં
વહામિ ચરણામ્બુજં પ્રણતિ શાલિના મૌલિના ।
તદન્યમતદુર્મદજ્વલિતચેતસાં વાદિનાં
શિરસ્સુ નિહિતં મયા પદમદક્ષિણં લક્ષ્યતામ્ ॥ ૪૧॥

ભજસ્વ યતિભૂપતેરનિદમાદિદુર્વાસના
કદધ્વ પરિવર્તનશ્રમનિવર્તનીં વર્તનીમ્ ।
લભસ્ય હૃદય સ્વયં રથપદાયુધાનુગ્રહ-
દ્રુતપ્રહૃતિ નિસ્તૃટદ્દુરિતદુર્વૃતિં નિર્વૃતિમ્ ॥ ૪૨॥

કુમતિવિહિતગ્રન્થગ્રન્થિપ્રભૂતમતાન્તર-
ગ્રહિલમનસઃ પશ્યન્ત્યલ્પાં યતીશ્વરભારતીમ્ ।
વિકટમુરભિદ્વક્ષઃ પીઠી પરિષ્કરણોચિતઃ
કુલગિરિતુલારોહે ભાવી કિયાનિવ કૌસ્તુભઃ ॥ ૪૩॥

સ્થવિરનિગમસ્તોમસ્થેયાં યતીશ્વરભારતીં
કુમતિફણિતિક્ષોભક્ષીબાઃ ક્ષિપન્તુ ભજન્તુ વા ।
રસપરિમલશ્વાઘા ઘોષસ્ફુટત્પુટભેદનં
લવણવણિજઃ કર્પૂરાર્ઘં કિમિત્યભિમન્વતે ॥ ૪૪॥ var કર્પૂરોદ્ધં

વહતિ મહિલામાધ્યો વેધાસ્ત્રયી મુખરૈર્મુખૈઃ
વરતનુતયા વામો ભાગઃ શિવસ્ય વિવર્તતે ।
તદપિ પરમં તત્ત્વં ગોપીજનસ્ય વશંવદં
મદનકદનૈર્ન ક્લિશ્યન્તે યતીશ્વરસંશ્રયાઃ ॥ ૪૫॥

નિગમપથિકચ્છાયા શાખી નિરાશમહાનિધિઃ
મહિતવિવિધચ્છાત્રશ્રેણી મનોરથસારથિઃ ।
ત્રિભુવનતમઃપ્રત્યૂષોઽયં ત્રિવિદ્યશિખામણિઃ
પ્રથયતિ યતિક્ષ્માભૃત્પારાવરીમવિપર્યયામ્ ॥ ૪૬॥

જડમતિ મુધા દન્તાદન્તિવ્યથૌષધસિદ્ધયઃ
પ્રમિતિનિધયઃ પ્રજ્ઞાશાલિ પ્રપાલનયષ્ટયઃ ।
શ્રુતિસુરભયઃ શુદ્ધાનન્દાભિવર્ષુકવારિદાઃ
યમગતિ કથા વિચ્છેદિન્યો યતીશ્વરસૂક્તયઃ ॥ ૪૭॥

પ્રતિકલમિહ પ્રત્યક્તત્ત્વાવલોકનદીપિકાઃ
યતિપરિબૃઢગ્રન્થાશ્ચિન્તાં નિરન્તરયન્તિ નઃ ।
અકલુષપરજ્ઞાનૌત્સુક્યક્ષુધાતુરદુર્દશા- var અકલુષપરિજ્ઞાન
પરિણત ફલ પ્રત્યાસીદત્ ફલેગ્રહિ સુગ્રહાઃ ॥ ૪૮॥

મુકુન્દાઙ્ઘ્રિશ્રધ્દા કુમુદવનચન્દ્રાતપનિભાઃ
મુમુક્ષામાક્ષોભ્યાં દદતિ મુનિવૃન્દારકગિરઃ ।
સ્વસિધ્દાન્તધ્વાન્તસ્થિરકુતુકદુર્વાદિપરિષદ્-
દિવાભીતપ્રેક્ષા દિનકરસમુત્થાનપરુષાઃ ॥ ૪૯॥

નિરાબાધા બોધાયનભણિતિ નિષ્યન્દસુભગાઃ var ફણિતિ, ભણિત
વિશુધ્દોપન્યાસવ્યતિભિદુરશારીરકનયાઃ ।
અકુણ્ઠૈઃ કલ્પન્તે યતિપતિનિબન્ધા નિજમુખૈઃ
અનિદ્રાણપ્રજ્ઞારસધમનિ વેધાય સુધિયામ્ ॥ ૫૦॥

વિકલ્પાટોપેન શ્રુતિપથમશેષં વિઘટયન્
યદૃચ્છાનિર્દિષ્ટે યતિ નૃપતિ શબ્દે વિરમતિ ।
વિતણ્ડાહંકુર્વત્પ્રતિકથકવેતણ્ડપૃતના-
વિયાતવ્યાપારવ્યતિમથનસંરમ્ભકલહઃ ॥ ૫૧॥

પ્રતિષ્ઠા તર્કાણાં પ્રતિપદમૃચાં ધામ યજુષાં
પરિષ્કારઃ સામ્નાં પરિપણમથર્વાઙ્ગિરસયોઃ ।
પ્રદીપસ્તત્વાનાં પ્રતિકૃતિરસૌ તાપસગિરાં
પ્રસત્તિમ્ સંવિત્તેઃ પ્રદિશતિ યતીશાનફણિતિઃ ॥ ૫૨॥ var પ્રદિશતુ

હતાવધ્યે હૃધ્યે હરિચરણપઙ્કેરુહયુગે
નિબધ્નન્ત્યૈકાન્ત્યં કિમપિ યતિ ભૂભૃત્ફણિતયઃ ।
શુનાસીરસ્કન્ધદ્રુહિણહરહેરમ્બહુતભુક્-
પ્રભેશાદિ ક્ષુદ્રપ્રણતિ પરિહારપ્રતિભુવઃ ॥ ૫૩॥

યથાભૂત સ્વાર્થા યતિ નૃપતિસૂક્તિર્વિજયતે
સુધા સંદોહાબ્ધિઃ સુચરિતવિપક્તિઃ શ્રુતિમતામ્ ।
કથા દૃપ્યત્કૌતસ્કુતકલહકોલાહલહત-
ત્રિવેદી નિર્વેદપ્રશમનવિનોદપ્રણયીની ॥ ૫૪॥

શ્રુતિશ્રેણીચૂડાપદબહુમતે લક્ષ્મણમતે

સ્વપક્ષસ્થાન્ દોષાન્ વિતથમતિરારોપયતિ યઃ ।
સ્વહસ્તેનોત્ક્ષિપ્તૈઃ સ ખલુ નિજગાત્રેષુ બહુલં
ગલદ્ભિર્જમ્બાલૈર્ગગનતલમાલિમ્પતિ જડઃ ॥ ૫૫॥

નિરાલોકે લોકે નિરુપધિ પરસ્નેહભરિતો
યતિ ક્ષ્માભૃદ્દીપો યદિ ન કિલ જાજ્વલ્યત ઇહ ।
અહંકારધ્વાન્તં વિજહતિ કથંકારમનઘાઃ
કુતર્ક વ્યાલૌઘં કુમતિ મતપાતાળકુહરમ્ ॥ ૫૬॥

યતિ ક્ષ્માભૃદ્દૃષ્ટં મતમિહ નવીનં તદપિ કિં
તતઃ પ્રાગેવાન્યદ્વદ તદપિ કિં વર્ણનિકષે ।
નિશામ્યન્તાં યદ્વા નિજમતિતિરસ્કારવિગમાત્ var નિજમત
નિરાતઙ્કાષ્ટઙ્કદ્રમિડગુહદેવ પ્રભૃતયઃ ॥ ૫૭॥

સુધાસારં શ્રીમધ્યતિવર ભુવઃ શ્રોત્રકુહરે
નિષિઞ્ચન્તિ ન્યઞ્ચન્નિગમગરિમાણઃ ફણિતયઃ ।
યદાસ્વાદાભ્યાસપ્રચયમહિમોલ્લાસિતધિયાં
સદાસ્વાધ્યં કાલે તદમૃતમનન્તં સુમનસામ્ ॥ ૫૮॥

યતિ ક્ષોણીભર્તુર્યદિદમનિદં ભોગજનતા-
શિરઃ શ્રેણીજુષ્ટં તદિહ દૃઢબન્ધં પ્રભવતિ । var મનસિ દૃઢબદ્ધં પ્રભવતુ
અવિદ્યારણ્યાની કુહરવિહરન્મામકમનઃ-
પ્રમાદ્યન્માતઙ્ગપ્રથમનિગલં પાદયુગલમ્ ॥ ૫૯॥

સવિત્રી મુક્તાનાં સકલજગદેનઃ પ્રશમની
ગરીયોભિસ્તીર્થૈરુપચિતરસા યામુનમુખૈઃ ।
નિરુચ્છેદા નિમ્નેતરમપિ સમાપ્લાવયતિ માં var દુરુચ્છેદા
યદૃચ્છા વિખ઼઼્શેપાદ્ યતિપતિદયા દિવ્યતટિની ॥ ૬૦॥

ચિન્તાશેષદુરર્થદન્તુરવચઃ કન્થા શતગ્રન્થિલાઃ
સિધ્દાન્તા ન સમિન્ધતે યતિવરગ્રન્થાનુસંધાયિનિ ।
મુક્તા શુક્તિવિશુધ્દસિધ્દતટિની ચૂડાલચૂડાપદઃ
કિં કુલ્યાં કલયેત ખણ્ડપરશુર્મણ્ડૂકમઞ્જૂષિકામ્ ॥ ૬૧॥

વન્દે તં યમિનાં ધુરન્ધરમહં માનાન્ધકારદ્રુહા
પન્થાનં પરિપન્થિનાં નિજદૃશા રુન્ધાનમિન્ધાનયા ।
દત્તં યેન દયા સુધામ્બુનિધિના પીત્વા વિશુધ્દં પયઃ

કાલે નઃ કરિશૈલકૃષ્ણજલદઃ કાઙ્ક્ષાધિકં વર્ષતિ ॥ ૬૨॥

કાષાયેણ ગૃહીતપીતવસનાદણ્ડૈસ્ત્રિભિર્મણ્ડિતા
સા મૂર્તિર્મુરમર્દનસ્ય જયતિ ત્રય્યન્તસંરક્ષિણી ।
યત્ પ્રખ્યાપિતતીર્થવર્ધિતધિયામભ્યસ્યતાં યદ્ગુણાન્
આસિન્ધોરનિદં પ્રદેશનિયતા કીર્તિઃ પ્રજાગર્તિ નઃ ॥ ૬૩॥

લિપ્સે લક્ષ્મણયોગિનઃ પદયુગં રથ્યા પરાગચ્છટા
રક્ષારોપણધન્યસૂરિપરિષત્સીમન્તસીમાન્તિકમ્ ।
ભિક્ષા પર્યટનક્ષણેષુ બિભરાંચક્રે ગળત્કિલ્બિષા
યદ્વિન્યાસમિષેણ પત્રમકરીમુદ્રાં સમુદ્રામ્બરા ॥ ૬૪॥ var પદ્મમકરીમુદ્રાં

નાના તન્ત્રવિલોભિતેન મનસા નિર્ણીતદુર્નીતિભિઃ
કષ્ટે કુત્સિતદૃષ્ટિભિર્યતિપતેરાદેશવૈદેશિકૈઃ ।
વ્યાસો હાસપદી કૃતઃ પરિહૃતઃ પ્રાચેતસશ્ચેતસઃ
ક્લુપ્તઃ કેલિશુકઃ શુકઃ સ ચ મુધા બાધાય બોધાયનઃ ॥ ૬૫॥ var મુધાબોધાય

અર્થ્યા તિષ્ઠતિ મામિકા મતિરસાવાજન્મરાજન્વતી
પત્યા સંયમિનામનેન જગતામત્યાહિતચ્છેદિના ।
યત્સારસ્વતદુગ્ધસાગરસુધા સિદ્ધૌષધાસ્વાદિનાં
પ્રસ્વાપાય ન બોભવીતિ ભગવન્માયા મહાયામિની ॥ ૬૬॥

શુધ્દાદેશવશંદદીકૃતયતિક્ષોણીશવાણીશતા-
પ્રત્યાદિષ્ટબહિર્ગતિઃ શ્રુતિશિરઃ પ્રસાદમાસીદતિ ।
દુગ્ધોદન્વદપત્યસન્નિધિ સદા સામોદદામોદર-
શ્લક્ષ્ણાલોકેન દૌર્લલિત્ય લલિતોન્મેષા મનીષા મમ ॥ ૬૭॥

આસ્તાં નામ યતીન્દ્રપધ્દતિ જુષામાજાનશુધ્દા મતિઃ
તચ્ચા વ્યાજવિદગ્ધમુગ્ધમધુરં સારસ્વતં શાશ્વતમ્ ।
કો વા ચક્ષુરુદઞ્ચયેદપિ પુરઃ સાટોપતર્કચ્છટા
શસ્ત્રાશસ્ત્રિવિહારસંભૃતરણાસ્વાસ્દેષુ વાદેષુ નઃ ॥ ૬૮॥

પર્યાપ્તં પર્યચૈષં કણચરણકથામાક્ષપાદં શિશિક્ષે
મીમાંસા માંસલાત્મા સમજનિષિ મુહુઃ સાંખ્યયોગૌ સમાખ્યમ્ ।
ઇત્થં તૈસ્તૈર્યતીન્દ્રત્રુટિતબહુમૃષા તન્ત્રકાન્તારપાન્થૈઃ
અન્તર્મોહક્ષપાન્ધૈરહહ કિમિહ નશ્ચિન્તનીયં તનીયઃ ॥ ૬૯॥

ગાથા તાથાગતાનાં ગલતિ ગમનિકા કાપિલી ક્વાઽપિ લીના var ગાધા
ક્ષીણા કાણાદવાણી દ્રુહિણહરગિરઃ સૌરભં નારભન્તે ।
ક્ષામા કૌમારિલોક્તિર્જગતિ ગુરુમતં ગૌરવાત્ દૂરવાન્તં
કા શઙ્કા શઙ્કરાદેર્ભજતિ યતિપતૌ ભદ્રવેદીં ત્રિવેદીમ્ ॥ ૭૦॥

વિષ્વગ્વ્યાપિન્યગાધે યતિનૃપતિ યશઃ સંપદેકાર્ણવેઽસ્મિન્
શ્રધ્દા શુધ્દાવગાહૈઃ શુભમતિભિરસૌ વેઙ્કટેશોઽભિષિક્તઃ ।
પ્રજ્ઞાદૌર્જન્યગર્જત્પ્રતિકથકવચસ્તૂલવાતૂલવૃત્યા
સપ્તત્યા સારવત્યા સમતનુત સતાં પ્રીતિમેતાં સમેતામ્ ॥ ૭૧॥

આશામતઙ્ગજગણાનવિષહ્ય વેગાન્
પાદે યતિક્ષિતિભૃતઃ પ્રસભં નિરુન્ધન્ ।
કાર્યઃ કથાહવ કુતૂહલિભિઃ પરેષાં
કર્ણે સ એષ કવિતાર્કિક્ સિંહનાદઃ ॥ ૭૨॥

ઉપશમિતકુદૃષ્ટિવિપ્લવાનામ્
ઉપનિષદામુપચારદીપિકેયમ્ ।
કબલિતભગવદ્વિભૂતિયુગ્માં
દિષતુ મતિં યતિરાજસપ્તતિર્નઃ ॥ ૭૩॥

કરતલામલકીકૃતસત્પથાઃ var સત્કથાઃ
શ્રુતિવતંસિતસૂનૃતસૂક્તયઃ ।
દિવસતારકયન્તિ સમત્સરાન્
યતિપુરન્દરસપ્તતિસાદરાઃ ॥ ૭૪॥

કવિતાર્કિક સિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

yatirAja Saptati (790 to 863)

Several true devotees of the Lord with a high degree of AchArya-Bhakti, have given expression to the sentiment that in the several works that go to make up the 4000 divya-prabandham there is none to equal rAmAnuja Nootrandadi sung in praise of rAmAnuja, the great shrIvaiShNava AchArya. In the same manner one can assert that out of the stotras of vedAnta deshika, yatirAja saptati, the Stotra in praise of the same great AchArya, stands unrivalled. This is not saying anything derogatory to the other stotras, nahi nindA-nyAya.

yati-rAja saptati breathes deshika′s Bhakti, often an infatuation, towards rAmAnuja whom he takes a pleasure in referring to as yatirAja – King among sannyAsins. According to deshika, sexual thoughts may beset brahmA, shiva and even nArAyaNa, but never a votary of yatIshvara (834). Lord varadarAja, the black cloud perched on the Elephant Hill (karI-shaila) is able to shower more than the desired benefits on His devotees only because of His having drunk deep from the Ocean of Nectar that is yatirAja′s dayA (851). yatirAja is an incarnation of the Lord's Five Weapons (801), and/or of vishvakShena, the Commander-in-Chief of the Lord′s Army in vaikunta (821), and/or of the Lord Himself (852). Curiously neither Amudanar in his rAmAnuja Nootrandadi, nor deshika in yatirAja saptati refers to rAmAnuja being sheShAvatAra (incarnation of adisheSha) as popularly believed by all.

One may read and re-read yatirAja saptati any number of times : he will not be able to make up his mind whether deshika′s fascination is for yatirAja, the Person, or for his works, or for the siddhAnta evolved and postulated in those works. That vedAnta deshika was first drawn towards yatirAja because of his works is seen from the first shloka in his praise in this work (799). deshika′s eulogy of the works in shloka 822 can be taken as typical of his great esteem and admiration. The reason is that only rAmAnuja′s works truly reflect (as in a mirror), lakShmI-kAnta (Consort of shrI) as He really is, whereas in other systems He is seen distorted, if He is seen at all. shloka 805 also postulates that the tattva known as hari can be seen whole and entire (akShatam) only in yatirAja′s SiddhAnta. A study of rAmanuja′s works under a proper AchArya will preserve our purity and prevent us from straying into faulty systems of thought (815).

All the greatness and glory that deshika achieved in his life are attributed to his association with the system promulgated by yatirAja (862) and to the blessings showered on him by great AchAryas immersed in yatirAja′s yasas (renown) (860).

Encoded and proofread by Pallasena Narayanaswami ppnswami at gmail.com

*yatirAja saptatiH*
pdf was typeset on August 17, 2024

Please send corrections to *sanskrit@cheerful.com*